# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-३ (SEM-5) | प्रश्नपत्र-६ | गुणाः - ७० |
| विषयः- साहित्यम् | CC-3510 | समयः - ११ तः ०२ |
| दिनाङ्कः - ३०/११/२०१६ | सन्दर्भग्रन्थः - कादम्बरी ( महाश्वेतावृत्तान्तः ) | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वयोः गद्यखण्डयोः ससन्दर्भं प्रसङ्गपुरस्सरं व्याख्या कार्या । ०८**

१. अथ गीतवसाने मूळीभूतवीणा सा कन्यका समुत्थाय प्रदक्षिणीकृत कृतहरप्रणामा परिवृत्य स्वभावधवलया तपः प्रभावप्रगल्भया दृष्ट्या सभाश्वासयन्तीव पुण्यैरिव स्पृशन्ती, चन्द्रापीडमाबभाषे ।

२. क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन, नवयौवनेन पदम् ।

३. अहो! रूपातिशयनिष्पादनोपकरणकोशस्य अक्षीणता विधातुः यत्त्रिभुवनाद्भुतरूपसम्भारं भगवन्तं कुसुमायुधमुत्पाद्य तदाकारातिरिक्तरूपराशिः अयमपरो मुनिमायामयो मकरकेतुरुत्पादितः ।

**प्र-२ कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत । ०८**

१. गद्यकाव्यस्योद्भवः विकासश्च सविस्तरं वर्णयत ।

२. बाणभट्टस्य जीवनपरिचयः लेख्यः ।

**प्र-३ टिप्पणीद्वयं लिखन्तु । ०४**

१. महाश्वेताजन्मवृत्तान्तः ।

२. कुसुममञ्जरीवर्णनम् ।

३. महाश्वेतां प्रति चन्द्रापीडप्रश्नाः ।

४. महाश्वेतायाः कामावस्थावर्णनम् ।

**प्र-४ पञ्चानाम् एकवाक्येन उत्तराणि लिखत । ०५**

१. चन्द्रपीडस्य अश्वनाम किम्?

२. महाश्वेतायाः पितरौ कौ?

३. गन्धर्वकुलानि कस्मिन् पर्वतप्रदेशे निवसन्ति स्म?

४. महाश्वेतावृत्तान्ते निरूपितस्य सरसः (सरोवरस्य) नाम किम्?

५. अप्सरसां कति कुलानि?

६. प्रस्रवणम् – शब्दस्य कोऽर्थः?

७. बलवती हि द्वन्द्वानां प्रवृत्तिः - इति कस्योक्तिः?

**॥ द्वितीयान्वितिः ॥**

**प्र-५ द्वयोः गद्यखण्डयोः ससन्दर्भं प्रसङ्गपुरस्सरं व्याख्या कार्या । ०८**

१. अथाहं तामसम्प्राप्तामेव भूतलमक्षमालां गृहीत्वा सलीलं तद्भुज-पाश-सन्दानितकण्ठग्रहसुखमिवानुभवन्ती दर्शितापूर्व-हारलता-लीलां कण्ठाभरणतामनयत् ।

२. क्व कन्दमूलफलाशी शान्तो वनवासनिरतः मुनिजनः क्व वायमशान्तजनोचितो विषयोपभोगाभिलाषकलुषो मन्मथविविधविलाससङ्कटो रागप्रायः प्रपञ्चः ।

३. अवतीर्य्य च पारिजातकुसुममञ्जरी-परिमलाकृष्टेन रिक्तीकृतोपवनेन कुमुदवनान्यपहाय धावता मधुकरजालेन नीलपटावगुण्ठनविभ्रममिव सम्पादयतानुबध्यमाना प्रमदवनपक्षद्वारेण निर्गत्य तत्समीपम् उदचलत्।

**प्र-६ कस्यचिदेकस्य ग्रन्थोक्तदिशा निबन्धात्मकमुत्तरं लेखनीयम्।** **०८**

१. मदनपीडितपुण्डरीकदशावर्णनं कुर्वन्तु।

२. पुण्डरीकं प्रति कपिञ्जलोपदेशः वर्णनीयः।

**प्र-७ द्वयोरेका टिप्पणी विधेया।** **०२**

१. पुण्डरीकः।

२. महाश्वेतायाः अभिसारवर्णनम्।

**प्र-८ द्वौ प्रश्नौ एकेन वाक्येन समाधेयौ।** **०२**

१. कुसुममञ्जरी कस्य वृक्षस्यासीत्?

२. द्वौ मुनिकुमारौ कौ?

३. पुण्डरीकस्य पितुः नाम किम्?

**॥ तृतीयान्वितिः ॥**

**प्र-९ द्वयोः गद्यखण्डयोः ससन्दर्भं प्रसङ्गपुरस्सरं व्याख्या कार्या।** **०८**

१. उत्तिष्ठ, देहि मे प्रतिवचनम्, क्व तन्ममोपरि सुहृत्प्रेम क्व सा स्मितपूर्वाभिभाषिता च इत्येतानि चान्यानि च विलपन्तं कपिञ्जलमश्रौषम्।

२. प्रोयेण चैवंविधा दिव्या स्वप्नेऽप्यविसंवादिन्यो भवन्त्या कृतयः किमुत साक्षात्।

३. अचिन्त्यो हि महात्मनां प्रभावः बहुप्रकाराश्च संसारवृत्तयः, चित्रश्च दैवम्, आश्चर्यातिशयुक्ताश्च तपसिद्धयः, अनेकविधाश्च कर्म्मणां शक्तयः।

**प्र-१० एकस्य निबन्धात्मकमुत्तरं लिखन्तु।** **०८**

१. ग्रन्थोक्तदिशा महाश्वेताविलापवर्णनं लिखन्तु।

२. चण्डापीडद्वारा कृतं महाश्वेताश्वासनवर्णनं लेखनीयम्।।

**प्र-११ द्वयोः टिप्पणी विधेया।** **०४**

१. चन्द्रापीडः।

२. कपिञ्जलः।

३. महाश्वेता।

४. कपिञ्जलस्य मित्रोपरतवर्णनम्।

**प्र-१२ पञ्चप्रश्नाः एकवाक्येन समाधेयाः।** **०५**

१. तरलिका का?

२. मकरकेतुः अर्थात् कः?

३. नागकन्या अर्जुनभार्या का?

४. सिन्धुराजः कः?

५. धृतराष्ट्रस्य कन्या का?

६. पुण्डरीकम् - इति शब्दस्य कोऽर्थः?

७. अप्रयोजनं तपः, निःसुखाश्च लोकाः - इति कस्योक्तिः?